अलातशान्तिप्रकरणम्

ज्ञानेनाऽऽकाशकल्पेन धर्मान्यो गगनोपमान् ।
ज्ञेयाभिन्नेन संबुद्धस्तं वन्दे द्विपदां वरम् ॥१॥

अन्वयः

यः आचार्यः, आकाशकल्पेन(विभुत्वात्) ज्ञानेन, ज्ञेयाभिन्नेन ज्ञानेन(ज्ञेयैः, जीवैः, ज्ञानं अभिन्नं अग्नि-उष्णवत्, ज्ञेयः=आत्मा,आत्मस्वरूप-अव्यतिरिक्तेन), गगनोपमान्(गगनमुपमा येषां ते, तान्), धर्मान्(=जीवान्), संबुद्धः(ज्ञातवान् जानाति),
(अहं), द्विपदां वरं(पुरुषाणां प्रधानं, पुरुषोत्तमं), तं(ईश्वररूपंआचार्यं), वन्दे(अभिवादये)।

****

अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः ।
अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ॥२॥

अन्वयः

अस्पर्शयोगः(स्पर्शः संबन्धो न विद्यते यस्य योगस्य, अस्पर्शयोगः), वै नाम(ब्रह्मस्वभावः), सर्वसत्त्वसुखः (कश्चिदत्यन्तसुखसाधनविशिष्टोऽपि दुःखरूपः, यथा तपः, अयं अस्पर्शयोगः तु न तथा),
(कश्चिद्विषयोपभोगः सुखः न हितः), अयं तु सुखो हितश्च।(नित्यं अप्रचलितस्वभावत्वात्),
अविवादः(यस्मिन् अस्पर्शयोगे पक्षप्रतिपक्षग्रहणेन विवादः न विद्यते)। अविरुद्धः(आत्मप्रकाशः कस्यचित् विरुद्धः न भवति), शास्त्रेण देशितः(उपदिष्टः), अहं, तं(योगं), नमामि(प्रणमामि)।

****

भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि ।
अभूतस्यापरे धीरा विवदन्तः परस्परम् ॥ ३ ॥

●अन्वयः

केचित्(सत्कार्यवादिनः, साङ्ख्याः), भूतस्य(विद्यमानस्य, सतः), जातिं(जन्म, उत्पतिं), इच्छन्ति।
अपरे(असत्कार्यवादिनः, नैयायिकाः, माध्वाः), अभूतस्य(अविद्यमानस्य, असतः), (जातिं जन्म, उत्पतिं, इच्छन्ति)।
धीराः(प्राज्ञाभिमानिनः) परस्परं विवदन्तः(विरुद्धं, विपरीतं वा वदन्तः)।

****

भूतं न जायते किञ्चित्-अभूतं नैव जायते ।
विवदन्तो द्वया ह्येवमजातिं ख्यापयन्तिं ते ॥४॥

●अन्वयः

(असदवादीनः सदवादीनं प्रतिषेधति, कथं), भूतं(विद्यमानं वस्तु), किञ्चिद् न जायते(विद्यमानत्वात् आत्मवत्)।(सदवादीनः असदवादीनं प्रतिषेधति, कथं), अभूतं(अविद्यमानं वस्तु), नैव जायते (अविद्यमानत्वात्, शशविषाणवत्)।
ते, द्वयाः(द्वैतिनः), विवदन्तः(विरुधं वदन्तः, सत्-असतोः जन्मनी), (अर्थात्), अजातिं(अजन्म, अनुत्पत्तिं), ख्यापयन्ति(प्रकाशयन्ति)।

****

ख्याप्यमानामजातिं तैरनुमोदामहे वयम् ।
विवदामः न तैः सार्धम्-अविवादं निबोधत ॥५॥

●अन्वयः

तैः(प्रतिवादिभिः), ख्याप्यमानां अजातिं (अनुत्पत्तिं, अजन्म), न विवदामः(न विरुद्धं वदामः), किन्तु, वयं, (एवं अस्तु), (केवलं)अनुमोदामहे । तैः, सार्धं(सह), न अविवादं(विवादरहितं)।(हे शिष्याः, परमार्थदर्शनं, अस्मात्) निबोधत।

****

अजातस्यैव धर्मस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो धर्मो मर्त्यतां कथमेष्यति ॥६॥

●अन्वयः

वादिनः(द्वैतिनः), अजातस्य(स्वभावतः एव जन्मरहितस्य, अमृतस्य), धर्मस्य(जीवस्य), जातिं(जन्म) इच्छन्ति । अजातः, अमृतः, धर्मः, कथं मर्त्यतां(मरणधर्मत्वं), एष्यति(गमिष्यति)।

****

न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।
प्रकृतेरन्यथाभावो न कथंचिद्भविष्यति ॥७॥

●अन्वयः

मर्त्यं(मरणधर्मशीलं), अमृतं(अमरणशीलं), न भवति, तथा, अमृतं(अमरणशीलं), मर्त्यं (मरणधर्मशीलं), न भवति । प्रकृतेः(स्वभावस्य), अन्यथाभावः(स्वरूपप्रच्युतिः, कथंचिद् न भविष्यति ।

****

स्वभावेनामृतो यस्य धर्मो गच्छति मर्त्यताम् ।
कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ॥८॥

●अन्वयः

यस्य(वादिनः), स्वभावेन अमृतः धर्मः, मर्त्यतां (मरणधर्मशीलं), गच्छति(परमार्थतः जायते), तस्य (वादिनः उत्पतेः प्राग् सत् भावः स्वभावतः अमृतः इति प्रतिज्ञा मृषा एव), कृतकेन(हेतुना), अमृतस्य कथं निश्चलः(अमृतस्वभावत्वं) स्थास्यति(न स्थास्यति एव)।

****

सांसिद्धिकी स्वाभाविकी सहजा अकृता च या ।
प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या ॥९॥

●अन्वयः

या, सांसिद्धिकी(सम्यक्सिद्धिः, योगिनां अणिमादि-ऐश्वर्यप्राप्तिः प्रकृतिः, कालयोः अपि न विपर्येति), स्वाभाविकी(अग्न्यादीनां उष्णतालक्षणा, कालान्तरे देशान्तरे च न व्यभिचरति), सहजा(पक्ष्यादीनां आकाशगमनादिलक्षणा), अकृता(अपां निम्नदेशगमनादिलक्षणा), च(अन्याऽपि) प्रकृतिः विज्ञेया (लोके) इति। (मिथ्याकल्पितेषु वस्तुषु अपि) सा स्वभावं न जहाति, (किमुत अजस्वभावेषु परमार्थवस्तुषु अमृतत्वलक्षणा प्रकृतिः)

****

जरामरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः ।
जरामरणमिच्छन्तश्च्यवन्ते तन्मनीषया ॥१०॥

●अन्वयः

सर्वे धर्माः(जीवाः, उपहितचैतन्यं एव), स्वभावतः जरामरणनिर्मुक्ताः(सर्वविक्रियावर्जिताः)।
(सर्वविक्रियावर्जिताः एवं स्वभावाः सन्तः, तत्-जरामरण-भाव-भावितत्वात्-कल्पितत्वात्),
जरामरणं इच्छन्तः(जीवाः), (तस्मात्), च्यवन्ते(जरामरणादिमन्तः भवन्ति)।

****

कारणं यस्य वै कार्यं कारणं तस्य जायते ।
जायमानं कथमजं भिन्नं नित्यं कथं च तत् ॥११॥

●अन्वयः (वैशेषिकः साङ्ख्यान् आह)।
यस्य(वादिनः), कारणं वै, कार्यं(कार्य-आकारेण परिणमते), तस्य(साङ्ख्यवादिनः), कारणं(अजं, सत्, प्रधानादि), (कार्य-महदादिरूपेण) जायते ।
कथं अजं(प्रधानादि कारणं) जायमानं(महदादिरूपेण)? (अजं, जायते इति विप्रतिषिद्धम्)।
नित्यं(प्रधानं), (कथं), भिन्नं(विदीर्णं, स्फुतितं एकदेशेन भवेत् ?)

****

कारणाद्यद्यनन्यत्वमतः कार्यमजं यदि ।
जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम् ॥१२॥

●अन्वयः (वैशेषिकः साङ्ख्यान् आह)।
यदि कारणात्(अजात्), (कार्यं)अनन्यत्वम् (त्वया इष्टं), (त ातः), कार्यं अजं (प्राप्तम् अनन्यत्वात्)।
(इदं विप्रतिषिद्धम्)। जायमानात् कार्यात् हि वै, कथं कारणं ध्रुवं(नित्यं भवति, विप्रतिषिद्धं एव)
(कुक्कुट्याः एकदेशः पच्यते, एकदेशः प्रसवाय न कल्प्यते)।

****

अजाद्वै जायते यस्य दृष्टान्तस्तस्य नास्ति वै ।
जाताच्च जायमानस्य न व्यवस्था प्रसज्यते ॥१३॥

●अन्वयः
यस्य (वादिनः), अजात्(नित्यात्, वस्तुनः), (कार्यं), जायते, तस्य(वादिनः), दृष्टान्तः नास्ति, वै (तस्मात्),(दृष्टान्त-अभावे, अन्यथा अनुपपत्या, किञ्चिद् न जायते इति सिद्धं भवति)।
(यदा), जातात्(कारणात्), जायमानस्य(वस्तुनः अभ्युपगमः), (तदा), न व्यवस्था प्रसज्यते(अन्यस्मात् जातात्, तदपि अन्यस्मात् जातात्, इति अनवस्थानं स्यात्)।

****

हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।
हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ॥१४॥

●अन्वयः
येषां(वादिनां), हेतोः(धर्माधर्मादेः), आदिः(कारणं), फलं(देहादिसङ्घातः), फलस्य(देहादिसङ्घातस्य), आदिः (कारणं), हेतुः(धर्माधर्मादिः भवति)।

(देहादिसङ्घातः)फलम्→आदिः(कारणं)→हेतोः(धर्माधर्मादिः)

हेतुः(धर्माधर्मादिः)→आदिः(कारणं)→फलस्य(देहादिसङ्घातस्य)
(तस्मात्), हेतोः((धर्माधर्मादिः), फलस्य(देहादिसङ्घातस्य), च अनादिः(अनादिमत्वं), कथं तैः(साङ्ख्यैः), उपवर्ण्यते।(*नित्यस्य, कूटस्थस्य, आत्मनः हेतुत्वं फलत्वं च न सम्भवति)।

****

हेतोरादिः फलं **येषामादिर्हेतुः फलस्य च ।**
तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ॥१५॥

●अन्वयः
(कथं येषां, वादिनां, हेतोः, धर्माधर्मादेः, आदिःकारणं, फलं, देहादिसङ्घातः, फलस्य, देहादिसङ्घातस्य, आदिः, कारणं, हेतुः, धर्माधर्मादिः भवति)।
यथा पितुः जन्म पुत्रात् भवति, तथा, तेषां(वादिनः), (हेतुः,धर्माधर्मात् जन्यात् एव फलं, फलात् देहादि-सङ्घात्, हेतोः धर्माधर्मादेः), जन्म भवेत् ।

****

संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया ।
युगपत्संभवे यस्मात्-असंबन्धो विषाणवत् ॥१६॥

●अन्वयः
संभवे, (प्रत्यक्षादिप्रमाणतः) हेतुफलयोः, त्वया, क्रमः, एषितव्यः(अन्वेष्टव्यः, हेतुः पूर्वं पश्चात्फलं चेति)।
यस्मात्, युगपत्संभवे (तयोः, कार्यकारणत्वं न संभवति), असंबन्धः स्यात्, यथा, (सव्येतरगो) विषाणवत् ।

****

फलादुत्पद्यमानः सन्, न ते हेतुः प्रसिध्यति ।
अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति ॥ १७ ॥

●अन्वयः
फलात्(जन्यात्, स्वतः अलब्धात्मकात्), उत्पद्यमानः सन्, हेतुः(कारणं), न प्रसिध्यति(जन्म न लभते)।
अप्रसिद्धः(अलब्धात्मकः हेतुः), कथं, फलं(कार्यं), उत्पादयिष्यति।(यस्मात्, इतरेतर-अपेक्षसिद्ध्योः, जन्मनोः, शशविषाणकल्पयोः, कार्यकारणभावेन संबन्धः, क्वचिद्, न दृष्टः)।

****

यदि हेतोः फलात्सिद्धिः फलसिद्धिश्च हेतुतः ।
कतरत्पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया ॥१८॥

●अन्वयः
(संबंधत्व-असंभरूपेण दोषेण, अपोदिते, त्यक्ते अपि, कार्यकारणभावे), यदि, हेतोः सिद्धिः फलात्, (हेतोः-कारणस्य सिद्धिः-जन्म, फलात्-कार्यात् वा), च हेतुतः फलसिद्धिः(फलस्य-कार्यस्य सिद्धिः-जन्म, हेतुतः-कारणात्)।(त्वया कारणकार्ययोः अन्योय-सिद्धिः, अभ्युपगम्यते, तर्हि), कतरत्पूर्वं निष्पन्नं, सिद्धिः अपेक्षया,(पश्चाद्भाविनः स्यात्, तद् मे ब्रूहि)।

****

अशक्तिरपरिज्ञानं क्रमकोपोऽथवा पुनः ।
एवं हि सर्वथा बुद्धैरजातिः परिदीपिता ॥१९॥

●अन्वयः
(अथ, एतत् सबन्धं, वक्तुं न शक्यते-इति मन्यसे, सा इयं), अशक्तिः, अपरिज्ञानं,(मूढता इत्यर्थः)।
अथवा, पुनः,(कारणात् कार्यं जन्म, वा, कार्यात् कारणं जन्म-सिद्धिः, इतरेतर-आनन्तर्यलक्षणः) क्रमकोपः (विपर्यासः, अन्यथाभावः स्यात्)।
हि(यस्मात्), एवं सर्वथा(कार्यकारणभाव-अनुपपत्तेः), बुद्धैः(पण्डितैः), अजातिः(सर्वस्य-अनुत्पत्तिः), परिदीपिता(प्रकाशिता भवति)।

****

बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः ।
न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ॥२०॥

●अन्वयः

(दृष्टान्तः साध्यसमः- unproven example, cannot be used to prove साध्यः-major term)
हि(यस्मात्), सः, बीजाङ्कुराख्यो दृष्टान्तः, सदा साध्यसमो , साध्यसमः हेतुः(दृष्टान्तः), साध्यसिद्धौ (सिद्धिनिमित्तं), न युज्यते(प्रमाणकुशलैः)।

****

पूर्वापरापरिज्ञानमजातेः परिदीपकम् ।
जायमानाद्धि वै धर्मात्कथं पूर्वं न गृह्यते ॥२१॥

●अन्वयः

(कार्यकारणयोः), पूर्व-अपर-अपरिज्ञानम्(कार्य-कारण-भाव-अनवधारणम्),(तस्मात्), अजातेः परिदीपकं, (नियते पौर्वापर्ये निर्धारिते जातिः सिध्यति)।
जायमानात्(कार्यात्), धर्मात्, कथं, पूर्वं(कारणं न गृह्यते?)| (कार्यकारणयोः संबन्धस्य अन्-अपेतत्वात् relation between cause and effect is not well ordained.) (तस्मात् अजातिः परिदीपकम्)।

****

स्वतो वा परतो वाऽपि न किञ्चिद्वस्तु जायते ।
सद्सत्सदसद्वाऽपि न किञ्चिद्वस्तु जायते ॥२२॥

●अन्वयः

*स्वतः किञ्चिद् वस्तु न जायते- स्वयमेव-अपरिनिष्पन्नत्वात्- e.g. घटात् न घटः।

*परतः अपि किञ्चिद् वस्तु न जायते- e.g. पटात् घटः वा घटात् पटः,

*न उभयतः अपि किञ्चिद् वस्तु न जायते- विरोधात्-अदृष्टचरत्वात्

*सतः अपि किञ्चिद् वस्तु न जायते- सत्त्वात्, मृत्पिण्डादिवत्-'वाचारम्भणम्'

****

हेतुर्न जायतेऽनादेः फलं चापि स्वभावतः ।
आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते ॥२३॥

●अन्वयः

अनादेः(आदिरहितात् फलात्), हेतुः(कारणं) न जायते। स्वभावतः(निर्निमित्तं), फलं च, (आदि-रहितात् अनादेः हेतोः जायते इति न युक्तम्)।
(यस्मात्), आदिः कारणं न विद्यते यस्य (लोके), तस्य(अनादेः), हि आदिः न विद्यते।
(कारणवतः एव हि आदिः-कारणं, अभ्युपगम्यते न अकारणवतः, तस्मात् स्वभाववादः न युक्तः)।

****

प्रज्ञप्तेः सनिमित्तत्वम् अन्यथा द्वयनाशतः ।
संक्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता ॥२४॥

●अन्वयः (Philosophy of Realistic)

प्रज्ञप्तेः(प्रज्ञप्तिः-प्रज्ञानं, शब्दादि-प्रतीतिः, तस्याः सनिमित्तत्वं-निमित्तं कारणं, विषयः), सनिमित्त्वं (सविषयत्वम्)। अन्यथा(निर्विषये सति), द्वयस्य(वैचित्र्यस्य, शब्दस्पर्शनीलपीतलोहितादिवैचित्र्यस्य द्वयस्य), नाशतः(नाशः-अभावः प्रसज्येत्)।

(संक्लेशनम्-दुःखम्), (अग्निदाहादिनिमित्तं दुःखं उपलभ्येत)। (ज्ञानाव्यतिरिक्तस्य), अस्तिता(अस्तित्वं), परतन्त्रा(बाह्यार्था), मता(अभिप्रेता अस्माभिः) ।(विज्ञानमात्रे संक्लेशो न युक्तः, अन्यत्र अदर्शनात्)।

****

चित्तं न संस्पृशत्यर्थं नार्थाभासं तथैव च ।
अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् ॥ २६ ॥

●अन्वयः

(यस्मात् सुषुप्त-समाहित-मुक्तानां, भ्रान्तिदर्शन-अभावे, आत्मव्यतिरिक्तः बाह्यविषयः न उपलभ्यते)। (तस्मात्), चित्तं(विज्ञानं), अर्थं(बाह्यविषयं), न संस्पृशति। तथा, (चित्तं, विज्ञानं), अर्थाभासं (बाह्यविषयाभासं न संस्पृशति।)

यतः (यस्मात् सुषुप्त-समाहित-मुक्तानां, भ्रान्तिदर्शन-अभावे, आत्मव्यतिरिक्तः बाह्यविषयः न उपलभ्यते), अर्थः(बाह्यविषयः), अभूतः(असद्-एव,मिथ्या) ।

अर्थाभासः(बाह्यविषयाभासः), ततः(चितात्), पृथक्(चितं), न (अवभासते)।

****

निमित्तं न सदा चित्तं संस्पृशत्यध्वसु त्रिषु ।
अनिमित्तो विपर्यासः कथं तस्य भविष्यति ॥ २७॥

●अन्वयः

त्रिषु अध्वसु(कालत्रयेऽपि), चित्तं(चैतन्यं विज्ञानं), निमितं(विषयं, अर्थं) न संस्पृशति। (असति घटे, घटस्य भासनं-विपर्ययः, चित्तस्य अर्थसंस्पर्शनं कदाचिद् नास्ति)। (तस्मात्) तस्य(चित्तस्य), विपर्यासः(भ्रान्तिः, भ्रमरूपता), अनिमित्तः(संस्काररूपनिमित्तशून्यः), कथं भविष्यति(कथंचिद् विपर्यासः नास्ति -इति अभिप्रायः)।

****

तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।
तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम्॥ २८॥

●अन्वयः

(प्रज्ञप्तेः(ver.25), सनिमित्तत्वं इत्यादि एतद् अन्तेन(ver.28), विज्ञानवादिनः, बाह्यार्थवादिपक्षप्रतिषेधं वचनं आचार्येण अनुमोदितम्। विज्ञानवादिनः पक्षप्रतिषेधाय, 'तस्मात्' इत्यादि उच्यते ।)

यथा चित्तदृश्यं(नीलादिः), न जायते , तस्मात्(असति घटे, घटादि-अवभासता, चित्तस्य, विज्ञानस्य, जायमाना, अवभासता, जन्मनि युक्ता), न जायते चित्तं(विज्ञानम्)।

ये(विज्ञानवादिनः), तस्य(चित्तस्य, चैतन्यस्य), जातिं(जन्म), पश्यन्ति, ते खे, (पक्ष्यादीनां) पदं पश्यन्ति।

****

अजातं जायते यस्माद्-अजातिः प्रकृतिस्ततः ।
प्रकृतेरन्यथाभावो न कथंचिद् भविष्यति ॥ २९॥

●अन्वयः

(यत्, अजातं-चित्तं-ब्रह्म-एव जायते इति वादिभिः परिकल्प्यते), तद् अजातं जायते, यस्माद्,

अजातिः प्रकृतिः(स्वभावः), ततः(तस्माद्-अजातरूपायाः-प्रकृतेः), अन्यथाभावः(जन्म), कथंचिद् न भविष्यति।

****

अनादेरन्तवत्त्वं च संसारस्य न सेत्स्यति ।
अनन्तता चाऽऽदिमतो मोक्षस्य न भविष्यति ॥३०॥

●अन्वयः

(अयं च अपरः दोषः, परमार्थसद्भाववादिनां, आत्मनः संसारस्य, आत्मनः मोक्षस्य, उच्यते।)
संसारस्य, अनादेः(अतीतकोटिरहितस्य), अन्तवत्त्वं, न सेत्स्यति(सिद्धिं न प्राप्नोति)।
(कश्चिद् पदार्थः, अनादिः सन्, अन्तवान् , लोके न दृष्टः)।
(तथा), मोक्षस्य(विज्ञानप्राप्तिकालप्रभवस्य), च अनन्तता, आदिमतः, न भविष्यति।

****

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तः-अवितथा इव लक्षिताः ॥३१॥

●अन्वयः

****

सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥३२॥

●अन्वयः

तेषां जाग्रतवस्तूनां सप्रयोजनता(अर्थवत्त्वं), स्वप्ने, विप्रतिपद्यते(विप्रतिषिध्यते)।
तस्मात्, आदौ-अन्तवत्त्वेन, ते(संसार-मोक्षः), मिथ्या, एव स्मृताः

****

सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् ।
संवृतेऽस्मिन्प्रदेशे वै भूतानां दर्शनं कुतः ॥३३॥

●अन्वयः

स्वप्ने, सर्वे धर्माः(पदार्थाः), मृषा, कायस्य(शरीरस्य), अन्तर्निदर्शनात्।
अस्मिन् संवृते प्रदेशे,(बुद्धिगुहायां), भूतानां, (परमार्थः)दर्शनं कुतः ।

****

न युक्तं दर्शनं गत्वा कालस्यानियमाद्गतौ ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन्देशे न विद्यते ॥३४॥

●अन्वयः

(जागरितावस्थायां गति-आगमनकालः नियतः, देशः नियतः)।
(स्वप्ने), कालस्य अभावात्, दर्शनं गत्वा, न युक्तम्। सर्वः, प्रतिबुद्धः, तस्मिन्देशे(स्वप्ने), न विद्यते।

****

मित्राद्यैः सह संमन्त्र्य संबुद्धो न प्रपद्यते ।
गृहीतं चापि यत्किञ्चित्प्रतिबुद्धो न पश्यति॥३५॥

●अन्वयः

संबुद्धः(पुरुषः), (स्वप्ने), संमन्त्र्य(मन्त्रणं), (जागरिते), न प्रपद्यते। प्रतिबुद्धः(पुरुषः), यत्किञ्चिद्

गृहीतं(हिरण्यादि), (जागरिते), न पश्यति ।

****

स्वप्ने चावस्तुकः कायः पृथगन्यस्य दर्शनात् ।
यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम् ॥३६॥

●अन्वयः

स्वप्ने, (स्वप्न)कायः, अवस्तुकः, अन्यस्य(जागरितकायस्य), पृथग् दर्शनात्।
यथा (स्वप्नदृश्यः) कायः अवस्तुकः, तथा सर्वं चित्तदृश्यं अवस्तुकं, (जागरितेऽपि, चित्तदृश्यत्वात्, स्वप्नसमत्वात्, जागरितं अपि, अवस्तुकम्)।

****

ग्रहणाज्जागरितवत् तत्, हेतुः स्वप्न इष्यते ।
तद्धेतुत्वात्तु तस्यैव सज्जागरितमिष्यते ॥३७॥

●अन्वयः

(जाग्रतवस्तुनः असत्त्वम्,) जागरितवत्-जागरितस्य-इव, ग्रहणात्(ग्राह्य-ग्राहकरूपेण),
तद्धेतुः(जागरितं स्वप्नस्य हेतुः), स्वप्नः, (जागरितकार्यं), इष्यते। जागरितं स्वप्नस्य हेतुत्वात्, तस्य (स्वप्नदृशः-स्वप्नं पश्यति इति, स्वप्न-दृश्-क्विप्) एव, सन्, जागरितं(वस्तु) इष्यते।

जागरितं→flimpsy connection→ स्वप्नः। जागरितं→is not same for different person
Each person's cognitions always differ from other, in terms of sight, perception, emotion etc.

****

उत्पादस्याप्रसिद्धत्वादजं सर्वमुदाहृतम् ।
न च भूतादभूतस्य संभवोऽस्ति कथंचन् ॥३८॥

●अन्वयः

उत्पादस्य(जन्मनः), अप्रसिद्धत्वात्, अजं, (वेदान्तेषु), सर्वं, उदाहृतम्('सबाह्यान्तरो ह्यजः' इति)।
कथंचन्, भूताद्(विद्यमानात्, सतः), अभूतस्य(अविद्यमानस्य), संभवः(उत्पत्तिः), नास्ति ।
(असतः शशविषाणादेः, संभवः न दृष्टः)। (जागरितात्-विद्यमानात्, असत्-स्वप्न जायते इति असत्)।

****

असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः ।
असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यति ॥३९॥

●अन्वयः

(यथा, स्वप्नजागरयोः, कार्यकारणभावः, अस्माभिः अभिप्रेतः)।
जागरिते (विकल्पितं वस्तु, असत्-अविद्यमानं, रज्जुसर्पवत्), दृष्ट्वा, तन्मयः(पुरुषः भवति)। (किन्तु),
स्वप्ने अपि, (जागरितवत्, ग्राह्य-ग्राहकरूपेण विकल्पयन् पुरुषः), दृष्ट्वा, प्रतिबुद्धो(तत्, स्वप्नवस्तु, प्रतिबोधनं पश्चात्),
न पश्यति ।

****

नास्त्यसद्धेतुकमसत्सदसद्धेतुकं तथा ।
सच्च सद्धेतुकं नास्ति, सद्धेतुकमसत्कुतः ॥४०॥

●अन्वयः

१.) असत्-हेतुकं असत् नास्ति→ e.g.→शशविषाणात् खकुसुमं न जायते।

२.) असत्-हेतुकं सत् नास्ति → e.g.→ शशविषाणादेः घटं न जायते ।

३.) सत्-हेतुकं सत् नास्ति → e.g.→ सतः, घटात्, सन् घटः न जायते ।

४.) सत्-हेतुकं असत् नास्ति → सत्कारणात् असत् कुतः जायते ।

****

विपर्यासाद्यथा जाग्रदचिन्त्यान्भूतवत्स्पृशेत् ।
तथा स्वप्ने विपर्यासाद्धर्मांस्तत्रैव पश्यति ॥४१॥

●अन्वयः

(कश्चिद्), यथा, विपर्यासात्(अविवेकतः), जाग्रत्(जागरिते), अचिन्त्यान्(अशक्य-चिन्तनीयान्- पदार्थान्), भूतवत् स्पृशेत्(सत्यान् इव पश्यति)।
तथा स्वप्ने, विपर्यासात्(अविवेकतः), धर्मान्(हस्ती-आदि पश्यन्, विकल्पयति), तत्र एव(स्वप्ने), पश्यति(न तु जागरितात्, उत्पद्यमानान्)।

****

उपलम्भात्समाचारादस्तिवस्तुत्ववादिनाम् ।
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ॥४२॥

●अन्वयः

बुद्धैः(अद्वैतवादिभिः), जातिः(जन्म), देशिता(उपदिष्टा), 'अस्ति-वस्तुत्व'वादिनां(एवंवदनशीलानां, दृढाग्रहवतां, श्रद्दधानां), उपलम्भात्(इन्द्रियेभ्यः जातिः उपलब्धा इति), समाचरात्(श्रुत्या विविधा विधिः निर्दिष्टा, वर्णाश्रमादिधर्म समाचरणात्)।(कस्मात् कारणात् देशिताः जातिः)। अजातेः(अजातिवस्तुनः), सदा त्रसतां(जनानां)
(आत्मनाशं मन्यमानां), उपायत्वेन जातिः(जन्म), देशिता(उपदिष्टा)।(न तु परमार्थबुद्ध्या जातिः)

****

अजातेस्त्रसतां तेषामुपलम्भाद्विद्यन्ति ये ।
जातिदोषाः न सेत्स्यन्ति दोषोऽप्यल्पो भविष्यति॥४३॥

●अन्वयः

ये, (उपलम्भात्, समाचारात् च, अजातेः-अजातिवस्तुनः, त्रसन्तः सन्तः), वियन्ति(विरुद्धं गच्छन्ति)।
तेषां, अजातेः(अजातिवस्तुनः), त्रसतां(जनानां, श्रद्दधानां, सन्मार्गावलम्बिनां), जातिदोषाः, न सेत्स्यन्ति (सिद्धिं न उपगच्छन्ति, दोषाः सिद्धाः न भविष्यन्ति)।
(यद्यपि कश्चित्), दोषः(स्यात्), (सः अपि), अल्पः भविष्यति।

****

उपलम्भात्समाचारान्मायाहस्ती यथोच्यते ।
उपलम्भात्समाचारादस्ति वस्तु तथोच्यते ॥४४॥

●अन्वयः

उच्यते, यथा, मायाहस्ती उपलम्भात् समाचारात् व्यभिचरति।(असन्, मायाहस्ती उपलभ्यते, जनाः, बन्धन-आरोहणादि हस्तिसम्बन्धिभिः, धर्मैः, समाचरन्ति)।

तथा, उपलम्भात् समाचारात्, (अद्वैतं भेदरूपं) 'अस्ति वस्तु'रुपं इव (अवभासते)।

****

जात्याभासं चलाभासं वस्त्वाभासं तथैव च ।
अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम् ॥४५॥

●अन्वयः

(यत्, परमार्थ-सद्-वस्तु, किं जन्मादि असद्-बुद्धयः आस्पदा इति आह)।

* जात्याभासं,→ अजाति(अजं), सत्-विद्यमानं, जातिवत् अवभासते ।

* चलाभासम्→ अजाति(अजं), चलम् इव अवभासते।

*वस्त्वाभासम्→ अजाति(अजं), वस्तु-द्रव्यं धर्मि, तदवत् अवभासते ।
(परमार्थतः तु), अजम्, अचलम् , अवस्तु-अद्रव्यम्। किं तद् एवंप्रकारं(ईदृग्धर्मापाधिकरणं), विज्ञानं, विज्ञप्तिः। जन्मादिरहितत्वात् शान्तम्, अद्वयम्।

****

एवं न जायते चित्तमेवं धर्मा अजाः स्मृताः ।
एवमेव विजानन्तो न पतन्ति विपर्यये ॥४६॥

●अन्वयः

एवं(यथोक्तेभ्यो हेतुभ्यो), चित्तं(चैतन्यं), न जायते, धर्माः(जीवाः), अजाः स्मृताः (ब्रह्मविद्भिः)।
एवं एव(यथोक्तं, अजं, अचलं, जात्यादिरहितं आत्मत्तत्वं), विपर्यये (अविद्याध्वान्तसागरे-अविद्या एव ध्वान्तं, तमस्-अविद्याध्वान्तं एव सागरः, तस्मिन्), विजानन्तः(ज्ञानीनः), न पतन्ति ।

****

ऋजुवक्रादिकाभासमलातस्पन्दितं यथा ।
ग्रहणग्राहकाभासं विज्ञानस्पन्दितं तथा ॥४७॥

●अन्वयः

यथा, ऋजुवक्रादि-आभासं अलातस्पन्दितं(उल्कास्पन्दितं), तथा, ग्रहणग्राहक-आभासं विज्ञानस्पन्दितं
(स्पन्दितं इव स्पन्दित, अविद्यया, अचलस्य, चैतन्यस्य स्पन्दनं नास्ति)।

****

अलाते स्पन्दमाने वै नाऽऽभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पन्दात्-आलातं प्रविशन्ति ते ॥४९॥

●अन्वयः

ते, आभासाः(ऋजुवक्रादि-आभासाः) वै, स्पन्दमाने अलाते, न अन्यतोभुवः(= अलातात् अन्यतः, कुतश्चित् आगत्य, अलाते न भवन्ति)। ततः अन्यत्र न निस्पन्दात्(अलातात् अन्यत्र न निर्गताः)।
(न च निस्पन्दनं अलातं), प्रविशन्ति ।

****

न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।
विज्ञानेऽपि तथैव स्युः-आभासस्य-अविशेषतः॥५०॥

●अन्वयः

न अलातात् ते, निर्गताः(आभासाः, ऋजुवक्रादि-आभासाः), द्रव्यत्व-अभावयोगतः(ऋजुवक्रादि- आभासाः, एव न द्रव्याः)। विज्ञाने(चैतन्ये), अपि, तथा एव स्युः(जन्मादि आभासाः एव मात्रं, न द्रव्याः), भासस्य अविशेषतः।

****

विज्ञाने स्पन्दमाने वै नाऽऽभासा अन्यतोभुवः ।
न ततोऽन्यत्र निस्पन्दात्, न विज्ञानं विशन्ति ते ॥५१॥

●अन्वयः

विज्ञाने स्पन्दमाने, आभासाः(जन्मादि, आकाशादि आभासाः), न अन्यतोभुवः(= अलातात् अन्यतः, कुतश्चित् आगत्य, अलाते न भवन्ति)।, ततः अन्यत्र न निस्पन्दात्(विज्ञानात् अन्यत्र न निर्गताः)।
ते(जन्मादि आभासाः), (न च निस्पन्दनं)विज्ञानं, विशन्ति ।

****

न निर्गतास्ते विज्ञानात्, द्रव्यत्व-अभावयोगतः ।
कार्यकारणताभावात्, यतोऽचिन्याः सदैव ते ॥५२॥

●अन्वयः

(अलातेन ऋजुवक्रादि-आभासाः, समानं सर्वं विज्ञानस्य (जन्मादि आभासाः) ।(तु, सदा अचलत्वं विज्ञानस्य विशेषः)। ते,(जन्मादि आभासाः), विज्ञानात्(चैतन्यात्), न निर्गताः ।
द्रव्यत्व-अभावयोगतः ।
यतः(यस्मात्), ते सदैव, कार्यकारण-अभावात् , अचिन्त्याः(मिथ्याभूतत्वात्)।

****

द्रव्यं द्रव्यस्य हेतुः स्यात्-अन्यत्-अन्यस्य चैव हि ।
द्रव्यत्वमन्यभावो वा धर्माणां नोपपद्यते ॥५३॥

●अन्वयः

अन्यत्-द्रव्यं, अन्यस्य-द्रव्यस्य हेतुः स्यात् ।(तस्य एव द्रव्यस्य द्रव्यं न भवति)।
(लोकेऽपि, अद्रव्यत्वं कस्यचित् कारणं न दृष्टम्)।
हि(यस्मात्), (आत्मा, अद्रव्यत्वात्, अद्वयत्वात् च, कस्यचित् कारणं, कार्यं वा न भवति)।
(तस्मात्), धर्माणां(जीवानां), द्रव्यत्वं, अन्यभावः(अद्रव्यभावः), न, उपपद्यते ।

****

एवं न चित्तजा धर्माः चित्तं वाऽपि न धर्मजम् ।
एवं हेतुफल-अजातिं प्रविशन्ति मनीषिणः ॥५४॥

●अन्वयः

एवं(यथोक्तेभ्यः हेतुभ्यः), चित्तं(आत्मस्वरूपविज्ञानं), चित्तजा धर्माः(मनस्पंदनाः), धर्मजं अपि न चित्तं(विज्ञानस्वरूपाभासमात्रत्वात्)।
मनीषिणः एवं हेतुफल-अजातिं(हेतोः फलं न जायते, फलात् न हेतुः), प्रविशन्ति(अध्यवस्यन्ति)।

****

यावत्-हेतुफलावेशः तावत्-हेतुफलोद्भवः ।
क्षीणे हेतुफलावेशे नास्ति हेतुफलोद्भवः ॥५५॥

●अन्वयः

यावत् हेतुफलादेशः(धर्म-अधर्माख्यस्य हेतोः'अहं कर्ता', 'मम धर्माधर्मौ', तत्-धर्माधर्मयोः फलं, 'अहं

कालान्तरे क्वचित् प्राणिनिकाये भोक्ष्ये'-इति हेतुफलादेशः -highly attached to doership, enjoyership), हेतुफलादेशः-आत्मन्यध्यारोपणम्)। तावत् हेतुफलोद्भवः(धर्माधर्मस्य फलस्य अनुच्छेदेन नैरन्तर्येण प्रवृतिः स्यात्),(किन्तु)
(यदा, यथोक्त-अद्वैत-दर्शनेन-अविद्याउद्भूत हेतुफलादेशः अपनीतः भवति,) तदा क्षीणे हेतुफलावेशे सति हेतुफलोद्भवः नास्ति ।

****

यावत्-हेतुफलावेशः संसारस्तावदायतः ।
क्षीणे हेतुफलावेशे संसारं न प्रपद्यते ॥५६॥

●अन्वयः
यावत् (सम्यग्दर्शनेन), हेतुफलावेशः (न निवर्तते), तावत् संसारः आयतः (दीर्घः), भवति।
पुनः क्षीणे हेतुफलावेशे(हेतुफलादेशः-आत्मन्यध्यारोपणम्), संसारं न प्रपद्यते ।(कारण-अभावात्)

****

संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै ।
सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ॥५७॥

●अन्वयः
सर्वं संवृत्या(संवरणं-संवृत्तिः-अविद्याविषयः लौकिकः व्यवहारः, तया) जायते। तेन(अविद्याविषये) शाश्वतं नास्ति। (अतः उत्पत्तिविनाशलक्षणः संसारः, आयतः-दीर्घः, व्यवहारमात्रः एव उच्यते)।
सद्भावेन(परमार्थभावेन), अजं सर्वं आत्मा एव, (अतः), तेन(अविद्याविषये, वस्तुतः जन्म-अभावेन), उच्छेदः (जात्यादि), नास्ति ।

****

धर्मा ये इति जायन्ते, जायन्ते ते न तत्त्वतः ।
जन्म मायोपमं तेषां सा च माया न विद्यते ॥५८॥

●अन्वयः
ये धर्माः, इति(यथोक्ता संवृतिः तया), जायन्ते(कल्प्यन्ते), तत्त्वतः(परमार्थतः) ते न जायन्ते ।
तेषां (धर्माणां), जन्म मायोपमं (माया उपमा यस्य तम्, मायया समम्), (तथा च), सा माया न विद्यते।
(माया-इति-अविद्यमानस्य-आख्या- इति अभिप्रायः)

****

यथा मायामयाद् बीजात्, जायते तन्मयोऽङ्कुरः ।
नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना ॥५९॥

●अन्वयः
यथा मायामयात् बीजात्, तन्मयः(मायामयः) अङ्कुरः जायते। असौ (अङ्कुरः), न च उच्छेदी(विनाशी, अभूतत्वात्)।
तद्वत्, धर्मेषु(जन्मनाशादि), योजना(युक्तिः)। (परमार्थतः, धर्माणां जन्म नाशः न युज्यते)।

****

नाजेषु सर्वधर्मेषु शाश्वत-अशाश्वत-अभिधा ।
यत्र वर्णा न वर्तन्ते विवेकस्तत्र नोच्यते ॥६०॥

●अन्वयः

अजेषु, सर्वधर्मेषु(आत्मसु, जीवेषु, परमार्थतः नित्य-एकरस-विज्ञप्तिमात्रसत्ताकेषु), शाश्वत(जन्म-अभावः), अशाश्वत-(विनाश-अभावः) अभिधा(अभिधानं प्रवर्तते) । यत्र (येषु), वर्णाः(शब्दाः), न वर्तन्ते(प्रवर्तते)। तत्र, (इदं एव ब्रह्म-इति), विवेकः(नित्य-अनित्यः) न उच्यते ।

****

यथा स्वप्ने द्वयाभासं चित्तं चलति मायया ।
तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ॥६१॥

●अन्वयः

यथा, स्वप्ने, द्वयाभासं चित्तं, मायया चलति (स्पन्दते) ।
तथा, जाग्रति, द्वयाभासं चित्तं मायया चलति(स्पन्दते) ।

****

अद्वयं च द्वयाभासं चित्तं स्वप्ने न संशयः ।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ॥६२॥

●अन्वयः

(परमार्थतः अद्वयस्य, चैतन्यस्य न वाग् गोचरत्वम्), जागरिते, स्वप्ने, अद्वयं च द्वयाभासं(ग्राह्यग्राहकरूपेण), चित्तं(चैतन्यं), न सशयः।

****

स्वप्नदृक्प्रचरन्स्वप्ने दिक्षु वै दशसु स्थितान्।
अण्डजान्स्वेदजान्वाऽपि जीवान्पश्यति यान्सदा ।।६३॥

●अन्वयः

स्वप्ने, प्रचरन्, स्वप्नदृक्, दशसु दिक्षु, यान्, स्थितान्, जीवान्, अण्डजान्, स्वेदजान्, सदा पश्यति ।

****

स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं स्वप्नदृक्चित्तमिष्यते ॥६४॥

●अन्वयः

(स्वप्नदृशः चित्तम्-ष.तत्पुरुषः), स्वप्नदृक्चित्तम्। ते दृश्याः, ततः(तस्मात्), (स्वप्नदृक्चित्तात्), पृथक्, न विद्यन्ते। (चित्तं एव, ह्यनेकजीवादिभेद-आकारेण विकल्प्यते)। तथा, तदपि, इदं स्वप्नदृक्चित्तं दृश्यमेव। (ततः, स्वप्नदृक्चित्तं दृश्यं- द्रष्टा एव)। (अतः, स्वप्नदृक्, व्यतिरेकेण, चित्तं नास्ति इत्यर्थः)।

****

चरञ्जागरिते जाग्रद्-दिक्षु वै दशसु स्थितान्।
अण्डजान्स्वेदजान्वाऽपि जीवान्पश्यति यान्सदा ॥६५॥

●अन्वयः

जागरिते, चरन्, जाग्रद्, दशसु दिक्षु, यान्, स्थितान्, जीवान्, अण्डजान्, स्वेदजान्, सदा पश्यति ।

****

जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते ॥६४॥

●अन्वयः

जाग्रतः पुरुषस्य, दृश्याः जीवाः, (ते), चित्तात् अव्यतिरिक्ताः, (चित्त-ईणीयत्वात्)। ततः(तस्मात्), ते पृथक् न विद्यन्ते । तथा, इदं दृश्यं(जीवाः) एव, तद्(चित्तम्), जाग्रतः(द्रष्टुः), चित्तं इष्यते। (चित्तं जीव-ईक्षणात्मकं, चित्तं द्रष्टुः अव्यतिरिक्तम्, द्रष्टा-द्रश्यत्वात्, स्वप्नचित्तवत्)।

****

उभे ह्यन्योन्यदृश्ये ते किं तदस्तीति नोच्यते ।
लक्षणाशून्यमुभयं तन्मतेनैव गृह्यते ॥६७॥

●अन्वयः

हि (यस्मात्), ते, उभे, अन्योन्यदृश्ये(जीवचित्ते-विषयविषयिणौ, ते, अन्योन्यग्राह्ये, 'जीवादिविषय-अपेक्षं हि चित्तं, चित्त-अपेक्षं हि जीवादि)। (तस्मात्, परस्परदृश्यत्वात्), किं तद् अस्ति, (विवेकिना) उच्यते, 'न'(अस्ति) । उभयं (चित्तं, चैत्यं), लक्षणां(प्रमाणं), शून्यं, तत् मतेन एव(भेदेन, द्वयं चित्ततया), गृह्यते ।

****

यथा स्वप्नमयो जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥६८॥

यथा मायामयो जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥६९॥

यथा निर्मितको जीवो जायते म्रियतेऽपि च ।
तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ॥७०॥

●अन्वयः

यथा, (मायाविना), मायामयः जीवः कृतः। यथा, (निर्मितकेन), निर्मितकः जीवः कृतः।यथा (स्वप्नदृशा), स्वप्नमयः जीवः जायते म्रियते । तथा, सर्वे अमी जीवाः(अण्डजादयः), भवन्ति न भवन्ति च। (चित्त-विकल्पनामात्राः, अविद्यमानाः इत्यर्थः)।

****

न कश्चिद् जायते जीवः संभवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किंचिद् न जायते ॥७१॥

●अन्वयः

(व्यावहारिकविषये, जीवानां जन्ममरणादिः, स्वप्नादिजीववत्)।
(परमार्थतः), जीवः(कर्ता, भोक्ता), कश्चिद् न जायते, अस्य(जीवस्य), संभवः न विद्यते । एतद् सत्यं (सत्यानां) उत्तमं, यत्र(यस्मिन्, सत्यस्वरूपे ब्रह्मणि अणुमात्रं अपि) किंचिद् न जायते ।

****

चित्तस्पन्दितमेवेदं ग्राह्यग्राहकवद् द्वयम् ।
चित्तं निर्विषयं नित्यं असङ्गं तेन कीर्तितम्॥७२॥

●अन्वयः

इदं स्पन्दितं चित्तं, एव ग्राह्यग्राहकवद् द्वयम् (दृश्यदर्शनात्मकं सर्वं एव द्वैतम्)। (परमार्थतः), चित्तं(आत्मा एव), निर्विषयं, नित्यं, असङ्गं कीर्तितम्। (निर्विषयत्वात्, चित्तं असङ्गं इति अर्थः)।

****

योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ ।
परतन्त्र-अभिसंवृत्या स्यान्नास्ति परमार्थतः ॥७३॥

●अन्वयः

यः(पदार्थः, शास्त्र-शास्तृ-शिष्यादि), अस्ति(विद्यते), सः कल्पितसंवृत्या एव (अस्ति, विद्यते), (परमार्थप्रतिपत्ति उपायत्वेन, सा कल्पिता संवृत्तिः, व्यवहारः)। असौ(पदार्थः, शास्त्र-शास्तृ-शिष्यादि), परमार्थेन न अस्ति(विद्यते) ।
2nd line
(यः पदार्थः, शास्त्र-शास्तृ-शिष्यादि), सः परतन्त्र-अभिसंवृत्या (परशास्त्रव्यवहारेण, other schools of phylosophy) स्यात् । परमार्थतः (सः पदार्थः), नास्ति एव ।

****

अजः कल्पितसंवृत्या परमार्थेन नाप्यजः ।
परतन्त्राभिनिष्पत्त्या संवृत्या जायते तु सः ॥७४॥

●अन्वयः

अजः(आत्मा), (शास्त्रादि) कल्पितसंवृत्या एव । परमार्थेन अजः अपि न (भवति), (देश-वस्तु-काल-अपरिच्छिन्नत्वात्)। परतन्त्राभिनिष्पत्त्या(परशास्त्रसिद्धिं अपेक्ष्य), (यः अजः आत्मा), सः संवृत्या जायते । (अतः, 'अजः' इति इयं कल्पना, परमार्थविषये न एव क्रमते, (Therefore, imagination of "Unborn", is not relevant in higher order of reality.)

****

अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ।
द्वयाभावं स बुद्ध्वा-एव निर्निमित्तो न जायते ॥७५॥

●अन्वयः

(यस्मात् द्वैतविषयः असन्, तस्मात् असति) अभूत-अभिनिवेशः अस्ति, (केवलं अभिनिवेश-आग्रहमात्रम्)। तत्र(तस्मिन् विषये), द्वैतं न विद्यते ।
द्वयाभावं बुद्ध्वा(ज्ञात्वा), (यः) निर्निमित्तः (निवृत्तमिथ्या-द्वय-अभिनिवेशः), सः न जायते ।

****

यदा न लभते हेतूनुत्तमाधममध्यमान् ।
तदा न जायते चित्तं हेतु-अभावे फलं कुतः ॥७६॥

●अन्वयः

(एकं एव अद्वितीयं आत्मतत्त्वं सर्वकल्पनावर्जितं जानन् सन्), यदा, (ज्ञानी), उत्तम-अधम-मध्यमान् हेतून् न लभते (न पश्यति), तदा, (देवादि-आकारैः उत्त्म-मध्यम-अधमफलरूपेण) चित्तं न जायते । हेतु-अभावे फलं कुतः ?? (असति हेतौ फलं न उत्पद्यते, बीजादि अभावे सस्यादि)।

****

अनिमित्तस्य चित्तस्य याऽनुत्पत्तिः समाऽद्वया ।
अजातस्यैव सर्वस्य चित्तदृश्यं हि तद्यतः ॥७७॥

●अन्वयः

यतः(यस्मात् विज्ञानात् प्राग् अपि), तद् चित्तदृश्यं (द्वयं जन्म च), सर्वस्य अजातस्य (चित्तस्य अधिष्ठानस्य एव)। अनिमित्तस्य चित्तस्य(परमार्थदर्शनेन निरस्तधर्माधर्माख्य-उत्पतिनिमित्तस्य चित्तस्य), या अनुत्पत्तिः(मोक्षाख्या), (सा), समा(सर्वदा सर्वावस्थासु), अद्वया(निर्विशेषा मोक्षाख्या अनुत्पत्तिः, सर्वदा-एकरूपा- इत्यर्थः).।

*अनिमित्तस्य चित्तस्य (परमार्थदर्शनेन निरस्तधर्माधर्माख्य-उत्पतिनिमित्तस्य,
धर्मः च अधर्मः-धर्माधर्मौ, धर्माधर्मः आख्यः यस्य सः-धर्माधर्माख्यः, धर्माधर्माख्यः एव निमित्तः-धर्माधर्माख्यनिमित्तः, निरस्तः धर्माधर्माख्यनिमित्तः यस्य सः निरस्तधर्माधर्माख्यनिमित्तः = अनिमित्तः चित्तः तस्य)।

****

बुद्ध्वा-अनिमित्ततां सत्यां हेतुं पृथग्-अनाप्नुवन् ।
वीतशोकं तथा अकामं-अभयं पदमश्नुते ॥७८॥

●अन्वयः

अनिमित्ततां(जन्मनिमित्तस्य द्वयस्य अभावात्), सत्यां(परमार्थरूपां), बुद्ध्वा, पृथक् हेतुं(देवादियोनिप्राप्तये धर्मादिकारणं), अन्-आप्नुवन्(पुरुषः), (त्यक्तः बाह्यैषणः सन्), वीतशोकं(कामशोकादिवर्जितं), अविद्यारहितं अभयं पदं अश्नुते । (पुनः न जायते)।

****

अभूत-अभिनिवेशात् हि सदृशे तत्प्रवर्तते ।
वस्त्वभावं स बुद्ध्वा-एव निःसङ्गं विनिवर्तते ॥७९॥

●अन्वयः

(असति, अभूते अस्तित्वनिश्चयः एव अभिनिवेशः), अभूत-अभिनिवेशात् (व्यामोहरूपात्) हि, सदृशे(तद्-अनुरूपे), तत्(चित्तं), प्रवर्तते । वस्तु-अभावं(द्वयस्य वस्तुनः), बुद्ध्वा एव, सः, निःसङ्गं(निरपेक्षं) विनिवर्तते ।

****

निवृतस्य- अप्रवृतस्य निश्चला हि तदा स्थितिः ।
विषयः स हि बुद्धानां तत्साम्यमजमद्वयम् ॥८०॥

●अन्वयः

(भावदर्शनेन, द्वैतविषयात्)निवृतस्य, (विषयान्तरे)अप्रवृतस्य, (चित्तस्य), तदा(तस्मिन् काले), निश्चला(चलनवर्जिता ब्रह्मस्वरूपा), स्थितिः(अद्वयविज्ञान-एकरससघन-लक्षणा भवति)।
हि(यस्मात्), (निश्चला, अद्वयविज्ञान-एकरससघन-लक्षणा, स्थितिः एव), स विषयः, बुद्धानां(परमार्थदर्शिनां), (तस्मात्), तत्, साम्यं, अजं, अद्वयं (परं निर्विषयम् भवति)।

****

अजं-अनिद्रं-अस्वप्नं प्रभातं भवति स्वयम् ।
सकृत्-विभातो हि-एव-एष धर्मो धातुः स्वभावतः॥८१॥

●अन्वयः

(बुद्धानां कीदृशः असौ विषयः ? इति आह) अजं, अनिद्रं, अस्वप्नं (ब्रह्म), स्वयं प्रभातं(स्वयं ज्योतिस्वभावं) भवति। सकृत्-विभातः(सदा-भातः). एव(लक्षणः आत्माख्यः) धर्मः, धातुः स्वभावः(वस्तुस्वभावः इत्यर्थः)।

****

सुखमाव्रियते नित्यं दुःखं विव्रियते सदा ।
यस्य कस्य च धर्मस्य ग्रहेण भगवान् असौ॥८२॥

●अन्वयः

(एवं उच्यमानं अपि बहुशः परमार्थतत्त्वं कस्मात् लौकिकैः न गृह्यते ?)
असौ भगवान्(जीवः, आत्मा, अद्वयः), यस्य कस्य (वस्तुनः), धर्मस्य, (मिथ्या-अभिनिविष्टतया) ग्रहेण(ग्रहणेन), नित्यं(परमार्थतत्त्वं), सुखं(सुखेन), आव्रियते(अनायासेन आच्छाद्यते) । (नित्यं, परमार्थतत्त्वं), दुःखं(दुःखेन) विव्रियते(प्रकटीक्रियते)।

****

अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चल-स्थिर-उभय-अभावैः आवृणोति एव बालिशः ॥८३॥

●अन्वयः

*अस्ति- (देह-व्यतिरेकः आत्मा अस्ति→ वैशेषिकादिपक्षः), चलः(न तु कूटस्थः),(घटादि अनित्यविलक्षणात्)

*नास्ति(देह-व्यतिरेकः अपि आत्मा नास्ति, किन्तु बुद्धिः= आत्मा → क्षणिकविज्ञानवादी), स्थिरः(निर्विशेषत्वात् --क्षणिकत्वेन-अनेक-क्षण-सम्बन्धित्व-अभावात्)

*अस्ति नास्ति (शरीरादौ आत्मा अस्ति, पाषाणादौ नास्ति, सद्-असद्वादी → दिगम्बर पक्षः), उभयः-चल-स्थिरविषयत्वात्

*नास्ति नास्ति (आत्मा नास्ति, शून्यम् एवं)→ शून्यवादी), अभावः ।
(परमार्थतत्त्व-अन्-अवबोधात्) बालिशः(अविवेकी), चल-स्थिर-उभय-अभावैः, (भगवन्तं), आवृणोति।

****

कोट्यश्चचतस्रः एतास्तु ग्रहैर्यासां सदाऽऽवृतः ।
भगवान-आभिः अस्पृष्टः येन दृष्टः स सर्वदृक् ॥८४॥

●अन्वयः

एताः कोट्यः(प्रावादुक-शास्त्र-निर्णयान्ताः- ascertainment of opponent),चतस्रः(अस्ति, नास्ति, अस्ति-नास्ति, नास्ति-नास्ति इति), यासां(कोटीनां), ग्रहैः(ग्रहणैः, उपलब्धिनिश्चयैः), (भगवान्), सदा आवृतः।
(सः एव), भगवान्, आभिः(चतसृभिः कोटिभिः) अस्पृष्टः(अस्ति-इत्यादि विकल्पनावर्जितः) । येन(मुनिना), दृष्टः(ज्ञातः, अपरोक्षीकृतः वेदान्तेषु-औपनिषदः पुरुषः), सः(मुनिः) सर्वदृक्(सर्वज्ञः) ।

****

प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयम् ।
अनापन्नादिमध्यान्तं किमतः परमीहते ॥८५॥

●अन्वयः

(ज्ञानी), प्राप्य कृत्स्नां(समस्तां), प्राप्य सर्वज्ञतां, अद्वयं, अनापन्नादिमध्यान्तं(अनापन्नाः,अप्राप्ताः उत्पत्तिस्थितिलयाः यस्य अद्वयस्य पदस्य, न विद्यन्ते तत् अनापन्नादिमध्यान्तं), ब्राह्मण्यं(ब्रह्मज्ञानेन ब्राह्मणः, ब्रह्मणः इदं ब्राह्मण्यं), पदं अश्नुते।
किं, अतः(आत्मलाभात् उर्ध्वं), परं ईहते(चेष्टते !!), (न ईहते एव, ईहनं निष्प्रयोजनम्, इत्यर्थः, किं आक्षेपार्थे)

****

विप्राणां विनयो ह्येष, शमः प्राकृतः उच्यते ।
दमः प्रकृतिदान्तत्वात्, एवं विद्वाञ्शमं व्रजेत् ॥८६॥

●अन्वयः

विप्राणां(ब्राह्मणानां), हि एषः विनयः(आत्मस्वरूपेण-अवस्थानं एव विनीतत्वं), शमः अपि प्राकृतः(स्वाभाविकः अकृतकः), दमः प्रकृतिदान्तत्वात् (स्वभावतः ब्रह्मणः उपशान्तरूपत्वात्)। विद्वान् एवं (यथोक्तं ब्रह्म) व्रजेत् ।

(ब्रह्मस्वरूपेण एव अवविष्ठते)।

****

सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते ।
अवस्तु सोपलम्भं च शुद्धं लौकिकमिष्यते ॥८७॥

●अन्वयः

सवस्तु(संवृतिसता =व्यावहारिकसत्तया = वस्तुना सह वर्तते इति), सोपलम्भं (उपलम्भेन सह वर्तते), द्वयं(ग्राह्य-ग्राहकलक्षणं), लौकिकं(लोक्यते इति लोकः, तस्मात् लोकात् अनपेत्य = जागरितं) इष्यते ।
अवस्तु(व्यावहारिकवस्तुनः अभावः), सोपलम्भं (वस्तुवत्, असति वस्तुनि अपि उपलम्भेन सह वर्तते), शुद्धं (केवलं, जागरितात् स्थूलात् लौकिकं, सर्वप्राणिसाधारणत्वात्) इष्यते ।

****

अवस्त्वनुपलम्भं च लोकोत्तरमिति स्मृतम् ।
ज्ञानं ज्ञेयं च विज्ञेयं सदा बुद्धैः प्रकीर्तितम् ॥८८॥

●अन्वयः

अवस्तु(व्यावहारिकवस्तुनः अभावः), अनुपलम्भं(ग्राह्य-ग्राहकलक्षणवर्जितं), (लोकातीतं, लोकात् अभावात् सर्वप्रवृत्ति-बीजं सुषुप्तं), लोकोत्तरं इति स्मृतं(ज्ञातः बुद्धैः)।
ज्ञानं(लौकिकं, शुद्ध लौकिकं, लोकोत्तरं, येन ज्ञानेन कारणेन ज्ञायते इति, ज्ञानम्), ज्ञेयं(एतानि त्रीणि लौकिकं, शुद्ध लौकिकं, लोकोत्तरं च), ज्ञेयं(परमार्थसत्यं, तुरीयाख्यं, अद्वयं, अजं आत्मतत्त्वम्), सदा, बुद्धैः(परमार्थदर्शिभिः) प्रकीर्तितम् ।

****

ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयम् ।
सर्वज्ञता हि सर्वत्र भवतीह महाधियः ॥८९॥

●अन्वयः

ज्ञाने च(लौकिकादिविषये), ज्ञेये(लौकिकादौ), त्रिविधे, क्रमेण(पूर्वलौकिकं स्थूलं, पश्चात् तत्-अभावेन शुद्धं लौकिकं, लोकोत्तरं इति), विदिते(परमार्थसत्ये, अद्वये, अजे, अभये),
इह(अस्मिन् लोके), सर्वत्र(सर्वदा, सकृत् विदितेस्वरूपे, अव्यभिचारात्), स्वयमेव, सर्वज्ञता(सर्वः च असौ ज्ञः च, तद्भावः), भवति, महाधियः(सर्वलोक-अतिशय-वस्तुविषयबुद्धित्वात्, महाबुद्धेः)।

****

हेय-ज्ञेय-आप्य-पाक्यानि विज्ञेयानि-अग्रयाणतः ।
तेषामन्यत्र विज्ञेयात्-उपलम्भः त्रिषु स्मृतः ॥९०॥

●अन्वयः

हेयानि(लौकादीनि त्रीणि, असत्त्वेन, आत्मनि जागरितस्वप्नसुषुप्तानि, रज्ज्वां सर्पवत्, हातव्यानि),
ज्ञेयं (चतुष्कोटि-सत्,असत्, सत्-असत्, असत्-असत् इति, वर्जितं परमार्थतत्त्वं),
आप्य(आप्तव्यानि, पाण्डित्यबाल्यमौनाख्यानि साधनानि भिक्षुणा)
पाक्यानि (रागद्वेषमोहादयः दोषाः, कषायाख्यानि, पक्तव्यानि-पतनोन्मुखीकरणीयानि पक्वफलवत्, भर्जनीयानि(roasted seed)),
(सर्वाणि एतानि हेयज्ञेय-आप्य-पाक्यानि विज्ञेयानि भिक्षुणा उपायत्वेन)।
अग्रयाणतः(अग्रे याति इति, प्रथमः), तेषां(तानि हेयादीनि, वर्जयित्वा), अन्यत्र विज्ञानात्(विज्ञेयं ब्रह्मैकं),

उपलम्भः(अविद्याकल्पनामात्रम्), त्रिषु (हेयाप्यपाक्योषु), ब्रह्मविद्भिः स्मृतः।

****

प्रकृत्याऽऽकाशवज्ज्ञेयाः सर्वे धर्माः अनादयः ।
विद्यते न हि नानात्वं तेषां क्वचन किंचन ॥९१॥

●अन्वयः

(परमार्थतः), प्रकृत्या(स्वभावतः), सर्वे धर्माः(जीवाः), (आत्मनः) ज्ञेयाः, आकाशवत्(सूक्ष्मनिरञ्जनसर्वगतत्वैः), अनादयः(नित्याः)। तेषां(धर्माणां), क्वचन किंचन, किंचिद्-अणुमपि, नानात्वं न विद्यते ।

****

आदिबुद्धाः प्रकृत्यैव सर्वे धर्माः सुनिश्चिताः ।
यस्यैवं भवति क्षान्तिः सोऽमृतत्वाय कल्पते॥९२॥

●अन्वयः

(परमार्थतः), प्रकृत्या(स्वभावतः), सर्वे धर्माः(जीवाः), आदिबुद्धाः(नित्यबोधस्वरूपाः, यथा नित्यप्रकाशस्वरूपः सविता एवं)। यस्य(मुमुक्षोः), एवं(यथोक्तेन प्रकारेण), क्षान्तिः(बोधकर्तव्यतानिरपेक्षता, स्वार्थं परार्थं वा) भवति, सः(मुमुक्षुः), अमृतत्वाय(मोक्षाय) कल्पते(समर्थः भवति) ।

****

आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव सुनिर्वृताः ।
सर्वे धर्माः सम-अभिन्नाः अजं साम्यं विशारदम्॥९३॥

●अन्वयः

(परमार्थतः, प्रकृत्या, स्वभावतः, सर्वे धर्माः, जीवाः), आदिशान्ताः(नित्यं एव), अनुत्पन्नाः(अजाः), प्रकृत्या एव सुनिर्वृताः(सुष्ठु परतस्वभावाः), सर्वे धर्माः सम-अभिन्नाः, अजं साम्यं विशारदं(विशुद्धं आत्मतत्त्व), (तस्मात् शान्तिः, मोक्षः वा नास्ति कर्तव्यः) ।

****

वैशारद्यं तु वै नास्ति भेदे विचरतां सदा ।
भेदनिम्नाः पृथग्वादास्तस्मास्ते कृपणाः स्मृताः॥९४॥

●अन्वयः

(यस्मात्), भेदनिम्नाः(भेद-अनुयायिनः, संसार-अनुरागिणः), पृथग्वादाः(पृथङ् नाना वस्तु अस्ति इति एवं वदनं येषां ते, द्वैतिनः), तस्मास्ते कृपणाः(क्षुद्राः), स्मृताः(ब्रह्मविद्भिः), सदा, भेदे विचरतां(अविद्याकल्पिते सर्वदा वर्तमानानां), (ते द्वैतिनः), वैशारद्यं(विशुद्धिः) तु वै नास्ति।

****

अजे साम्ये तु ये केचिद् भविष्यन्ति सुनिश्चिताः ।
ते हि लोके महाज्ञानाः तच्च लोको न गाहते ॥९५॥

●अन्वयः

तु, अजे साम्ये(परमार्थतत्त्वे), ये केचिद् सुनिश्चिताः भविष्यन्ति, ते हि लोके महाज्ञानाः(निरतिशयतत्त्व-विषयज्ञानाः), तत् च(तेषां वर्त्म, तेषां विदितं आत्मतत्त्वं), लोकः(सामान्यबुद्धिः) न गाहते (न विषयीकरोति)।

****

अजेष्वजमसंक्रान्तं धर्मेषु ज्ञानमिष्यते ।
यतो न क्रमते ज्ञानं असङ्गं तेन कीर्तितम् ॥९६॥

●अन्वयः

अजेषु(अनुत्पन्नेषु, अचलेषु), धर्मेषु अजं असंक्रान्तं(अर्थान्तरे न दृष्यते) ज्ञानं इष्यते । यतः(यस्मात्), ज्ञानं न क्रमते (अर्थान्तरे न दृष्यते), तेन(कारणेन) असङ्गं कीर्तितम्।(आत्मतत्त्वम्→न क्रमते, असङ्गम्, ज्ञानं →अपि न क्रमते, तस्मात् ज्ञानं असङ्गम्)।

****

अणुमात्रेऽपि वैधर्म्ये जायमाने अविपश्चितः ।
असङ्गता सदा नास्ति किमुता आवरणच्युतिः ॥९७॥

●अन्वयः

अणुमात्रे(अल्पे अपि), वैधर्म्ये(वस्तुनि बहिः वा अन्तः वा), जायमाने(उत्पद्यमाने), अविपश्चितः(अविवेकिनः), असङ्गता सदा नास्ति, किमुत वक्तव्यं आवरणच्युति(बन्धनाशः)।

****

अलब्धावरणाः सर्वे धर्माः प्रकृतिनिर्मलाः ।
आदौ बुद्धास्तथा मुक्ता बुध्यन्ते इति नायकाः॥९८॥

●अन्वयः

सर्वे धर्माः(जीवाः), आदौ बुद्धाः(नित्यज्ञानस्वरूपाः), अलब्ध-आवरणाः(अलब्धं-अप्राप्तं-अविद्यादिबन्धनं येषां ते, बन्धनरहिताः), प्रकृतिनिर्मलाः(स्वभावशुद्धाः), मुक्ताः(नित्यशुद्धबुद्धमुक्तस्वभावाः), (यदि एवं कथं तर्हि), बुध्यन्ते ? नायकाः(बोधशक्तिमत्स्वभावाः)। (यथा, नित्यप्रकाशस्वरूपोऽपि सविता प्रकाशते, यथा, नित्यनिवृतगतयोऽपि नित्यमेव शैलाः तिष्ठन्ति इति उच्यते, तद्वत्, आदौ बुद्धाः, तथाऽपि, बुध्यन्ते)।

****

क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तायिनः ।
सर्वे धर्मास्तथा ज्ञानं नैतद् बुद्धेन भाषितम् ॥९९॥

●अन्वयः

तायिनः(तायिन्→स्वाभाविकमनैन्द्रियादि-ऐकाग्र्यरूपतपस्विन्→तायी(M १/१)→६/१→तायिनः, निरन्तरस्य सर्वात्मकत्वात्), बुद्धस्य(परमार्थदर्शिनः), धर्मेषु(विषयान्तरेषु), ज्ञानं न क्रमते (अर्थान्तरे न दृष्यते), सर्वे धर्माः (जीवाः), तथा ज्ञानं (न क्रमते, स्वात्मस्वरूपत्वात्, सत्यं-ज्ञानं-सरूपत्वात्)।
एतद् (ज्ञातृ-ज्ञेय-ज्ञानभेदरहितं, अद्वयं, परमार्थतत्त्वं (गौतम)बुद्धेन न भाषितम् (यद्यपि, बाह्य-अर्थ-निराकरणं, ज्ञानमात्रकल्पना च अद्वयवस्तुसामीप्यं उक्तम्)।

****

दुर्दर्शं अतिगम्भीरं अजं साम्यं विशारदम् ।
बुद्ध्वा पदं अनानात्वं नमस्कुर्मो यथाबलम् ॥१००॥

●अन्वयः

दुर्दर्शं (दुःखेन दर्शनं अस्य इति, प्रत्यक्षादि-प्रमाण-अनधिगम्यत्वं), अतिगम्भीरं (दुष्प्रवेशं, सूक्ष्मबुद्धित्वात्), अजं(कूटस्थं), साम्यं(निर्विशेषत्वं), विशारदं(विशुद्धं, मलरहितं), अनानात्वं(नानात्वंवर्जितं), पदं बुद्धा(अवगम्य), (तद्भूताः सन्तः), (वयं तस्मै पदाय), नमस्कुर्मः, (अव्यवहार्यं अपि, व्यवहारगोचरतां आपाद्य), यथाबलं(बलं अनतिक्रम्य, यथाशक्ति इत्यर्थः) ।

इति गौडपदाचार्यकृता माण्डूक्योपनिषत्कारिका सम्पूर्णा ॥ॐ तत्सत्॥

अजमपि जनियोगं, प्रापदैश्वर्ययोगा-
दगति च गतिमत्तां प्रापदेकं ह्यनेकम्।
विविधविषयधर्मग्राहिमुग्धेक्षणानां
प्रणतभयविहन्तृ ब्रह्म यत्तन्नतोऽस्मि ॥१॥

●अन्वयः

अहं, तत्(ब्रह्म), नतः अस्मि।

* यत् ब्रह्म(कूटस्थं), ऐश्वर्ययोगात् (तदीय मायाशक्त्या-आत्मकेन, अनिर्वाच्य-ज्ञान-वैभवेन), अजं(सर्वविक्रियाशून्यं) अपि, जनियोगं(कार्यब्रह्मतां), प्रापद्(प्र-आप्तवत्), (अहं, तत् ब्रह्म , नतः अस्मि)।

* यत् ब्रह्म(कूटस्थं), ऐश्वर्ययोगात् (तदीय मायाशक्त्या-आत्मकेन, अनिर्वाच्य-ज्ञान-वैभवेन), अगति(गतिवर्जितं अवतिष्ठते अपि, ''कार्यं तु बादरिरस्य गति-उपपत्तेः इति''४-३-७ ब्र.सू.), गतिमत्तां(कार्यब्रह्मतां प्राप्य ब्रह्म) प्रापद्(प्र-आप्तवत्), (अहं, तत् ब्रह्म, नतः अस्मि)।

* यत् ब्रह्म(कूटस्थं), विविधविषयग्राहि(विविधाः विषयाः ग्रहीतुं शीलं यस्य), मुग्धेक्षणानां(मुग्धं ईक्षणं येषां), हि, एकं(ब्रह्म), अनेकं(अनेकत्वं प्रतिभान्ति), (अहं, तत् ब्रह्म , नतः अस्मि)।

* यत् ब्रह्म(प्रणतभयविहन्तृ), अहं, तत् ब्रह्म, नतः अस्मि ।

****

प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नोऽन्तरस्थं
भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समुद्रे ।
कारुण्यादुद्दधारामृतमिदममरैर्दुर्लभं भुतहेतो-
र्यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि॥ २॥

●अन्वयः

अहं, अमुं, तं(अपरोक्षत्वं सुचितं), पूज्याभिपूज्यं(पूज्यानां अपि गुरूणां अतिशयेन पूज्यत्वात्), परमगुरुं, पादपातैः (भूयः भूयः, नम्रीभावाः, तैः), नतः अस्मि ।

*यः(आचार्यः), अविरतजननग्राहघोरे समुद्रे, (अनवरतं, यानि जननानि, ग्राहाः जलचराः, तैः घोरे क्रुरे भयंकरे),मग्नानि (भग्नसंकल्पानि, कामकर्मादि, आयत्तानि), भूतानि, आलोक्य(दृष्ट्वा, उपलभ्य),

* कारुण्यात्, भूतहितायहेतोः, अमरैः(देवैः), दुर्लभं(ज्ञानसामग्रीसंपन्नैः एव लभ्यत्वात्), (ज्ञानं)अमृतं, उद्दधार, (धृतवान्, धृ-लिट्,प्र.पु.ए.व.), (कुत्र इदं अमृतं),

* अन्तरस्थं(अन्तःकरणे स्थितं), (कस्य अन्तःकरणे), जलनिधि(जलस्य निधिः), जलनिधेः वेदनाम्नोऽन्तरस्थं (इदं अमृतं),

*(केन प्रकारेण, अमृतं उद्दधार, धृतवान्, आचार्यः)
प्रज्ञावैशाख(प्रज्ञा-मेधा एव वैशाखः, मन्था),(तस्य वैशाखस्य मन्थानः वेधः, क्षेपणं), (तेन प्रज्ञावैशाखवेधेन), क्षुभित(विलोडितः, तेन प्रज्ञावैशाखवेधक्षुभितकारणेन, जलनिधेः वेदनाम्ना, अन्तरस्थं इदं अमृतं, उद्दधार, धृतवान्, आचार्यः), अहं, तं परमगुरुं, पादपातैः, नतः अस्मि ।

****

यत्प्रज्ञा-आलोकभासा प्रतिहतिं-अगमत्-स्वान्त मोह-अन्धकारः
मज्जत्-उनमज्जत् च घोरे हि-असकृत्-उपजन-उदन्वति-त्रासने-मे ।
यत्-पादौ-आश्रितानां श्रुति-शम-विनय-प्राप्तिः-अग्र्या हि-अमोघा
तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैः नमस्ये ॥३॥

●अन्वयः

* अहं सर्वभावैः(वाङ्-मनो-देहानां प्रह्वीभावैः), तत्पादौ, नमस्ये ।
तत्पादौ, पावनीयौ(पवित्रौ), भवभयविनुदौ (भवभयहरौ), (अहं तत्पादौ नमस्ये) ।

*यत् पादौ, आश्रितानां(शिष्याणां), श्रुतिप्राप्तिः(वेदान्ततात्पर्यनिश्चितरूपं प्राप्तिः, श्रवण-मनन-निदिध्यासेन), शमप्राप्तिः (विषयेन्द्रियेभ्यः उपरतिः), विनयप्राप्तिः(अवनतिः, अन-औद्धत्यं absence of pride), अग्र्या(श्रेष्ठा), अमोघा (सफला भवति), (अहं तत्पादौ नमस्ये) ।

*मे(मम), स्वान्त-मोह-अन्धकारः, यत्प्रज्ञा(आचार्यप्रज्ञया), आलोकभासा (दिप्त्या), प्रतिहतिं(विनाशं), अगमत् (गतवान्), (अहं तत्पादौ नमस्ये) ।

*असकृत्(अनेकशः), उपजनः(अनेकविधदेहभेदजननं), उदन्वति(उदधौ, सागरे), घोरे, त्रासने(भयावहे), मज्जत्(कदाचित् अज्ञानं कार्यरूपेण, अन्-अभिव्यक्तं, अवतिष्ठते- मज्जत्), उनमज्जत् (अज्ञानावस्थायां, तद् अज्ञानं कार्यरूपेण अभिव्यक्तं अनर्थकरं परिवर्तते-उनमज्जत्)। (तदेवं अतिक्रुरेसंसारसागरे, अज्ञानं, सकार्यं, प्रतिहतिं(विनाशं), अगमत्(गतवान्), (अहं तत्पादौ नमस्ये) ।

उदन्वति→ उदन्वत् (M.)loc.sing.
(उदक-म्तुप्, उदन् आदेशः, मस्य वः)
in the ocean

नमस्ये→नमस्य नामधातु 1st.per.sing. At.P.
(नमस्-वरिवस्-चित्रङ्ः क्यच्।३.१.१९)
my salutation